Agastya अगस्त्यदत्ताशीर्वादस्य वसिष्ठवचनसंवादेन स्थिरीकरणात् कृतिः RasāSu. 235. 17 (3. 72); 234. 21 (3. 71)

**अगस्त्यदर्शन** ( agastya-darśana ) *n.* **1** sight of or meeting with the sage Agastya अगस्त्यदर्शनं लब्ध्वा श्रुत्वा स्तोत्रं गतिप्रदम् । गमिष्यावः शुभाँल्लोकान् BrahmāṇḍP. ii. 35. 34; **2** appearance or sight of Canopus सलिलमपराङ्गयोज्झितं यद्धनपरिवेष्टितमूर्तिभिर्भुजङ्गैः । फणिजनितविषाग्निसंप्रदुष्टं भवति शिवं तदगस्त्यदर्शनेन BṛSaṁ. 12. 12.

**अगस्त्यदिक्पति** ( agastyadik-pati ) *m.* Yama, lord of the southern direction सोमपोऽगस्त्यदिग्( ? क् )पतिः AnekāNā.( Dha. ) 21.

**अगस्त्यदिश्** ( agastya-diś ) *f* the south, Agastya's direction अगस्त्यदिश्यारुतमापतन्तं वृष्टेरवग्राहमुशन्ति वृद्धाः YātrāPra. 4. 85.

**अगस्त्यदृश्वन्** ( agastya-dṛśvan ) *adj.* who had seen or met Agastya अगस्त्यदृश्वा रघुनन्दनस्ततः स खेदमन्तःकरणोत्थमत्यजत् SaṅkaDigVi.( Mā. ) 14. 122.

**अगस्त्यदृष्टि** ( agastya-dṛṣṭi ) *f.* the rise or appearance of the star Canopus अगस्त्यदृष्ट्या पुनती पयांसि ।…शरद्विचित्रैश्चरितैश्चकास्ति KāvyMī. 101. 16.

**अगस्त्यद्वार** ( agastya-dvāra ) *n.* Agastya as the means or medium कालेयास्तु यथा राजन्सुरैः सर्वैर्निषूदिताः । अगस्त्याद्वरम् ( v. l. अगस्त्यद्वारम् ) आसाद्य MahāBhā. iii. 102. 15.

**अगस्त्यध्रुव** ( agastya-dhruva ) *m.* the (fixed) longitude of the star Agastya (i. e. Canopus) अगस्त्यध्रुवः । सप्तनागास्तु भागास्तुरङ्गाद्रयस्तस्य याम्याः शरांशाः GrahaGa. 158. 26 (17. 7)

**अगस्त्यध्रुवक** ( agastyadhruva-ka ) *m.* the (fixed) longitude of the star Agastya (i. e. Canopus) तत्प्राणैर्विक्षेपे सौम्ये हीनो ग्रहोऽधिको याम्ये । उदयेऽर्भध्रुवको वागस्त्यध्रुवकोऽथवा लग्नम् BrāhmSphuSi. 10. 19.

**अगस्त्यनामन्** ( agastya-nāman ) *adj.* (the star) called Agastya (i. e. Canopus) उदये च मुनेरगस्त्यनाम्नः … अम्बूनि भवन्ति निर्मलानि BṛSaṁ. 12. 7.

**अगस्त्यनिर्दिष्ट** ( agastya-nirdiṣṭa ) *adj.* directed or pointed out by (sage) Agastya ततो गोदावरीतीरे रम्ये पञ्चवटीतटम् । जगामागस्त्यनिर्दिष्टं स्थितये रघुनन्दनः RāmāMañ. 118. 5.

**अगस्त्यनिर्मित** ( agastya-nirmita ) *adj.* (originally) prepared or discovered by (sage) Agastya एतदगस्त्यनिर्मितमलमनलजननम् AṣṭāSaṁ. ii. 73. 15 (4. 12)

**अगस्त्यनिवासदान** ( agastya-nivāsadāna ) *n.* providing or affording dwelling to Agastya (in the form of the star Canopus) क्रुध्यन्निवागस्त्यनिवासदानाद्दर्या ताडयन्नुच्चतरङ्गदण्डैः ।…प्रचुक्षोभ सरिद्भुजङ्गः SrīKaC. 12. 55.

**अगस्त्यपत्त्र** ( agastya-pattra ) *n.* the leaf of *Agasti grandiflora* पिबेत् । रसेनागस्त्यपत्राणां विडङ्गं चान्तरान्तरा RasRaSa. 28. 79.

**अगस्त्यपत्त्रतोय** ( agastyapattra-toya ) *n.* decoction of the leaves of *Agasti grandiflora* अगस्त्यपत्त्रतोयेन भाविता सप्तवारकम् ।…विशुध्यति मनःशिला RasRaSa. 3. 93.

**अगस्त्यपत्त्रद्रव** ( agastyapattra-drava ) *m.* juice of the leaves of *Agasti grandiflora* अगस्त्यपत्त्रद्रवसंयुतेन मध्वाज्यसंमिश्रितटङ्कणेन । लिप्त्वा ध्वजं यो रमतेऽङ्गनायाः स शुक्रमाव( ? क )र्षति शीघ्रमेव PañcSā. 3. 39.

**अगस्त्यपत्त्रनिर्यास** ( agastyapattra-niryāsa ) *m.* juice or exudation of the leaves of *Agasti grandiflora* अगस्त्यपत्त्रनिर्यासैः शिग्रुमूलं सुपेषितम् । तन्मध्ये पुटितं शुध्येत् RaseCin. 7. 60 (71. 6)

**अगस्त्यपत्त्राकार** ( agastyapattrākāra ) *adj.* having the shape of (i. e. resembling) the leaf of *Agasti grandiflora* ऊर्ध्वपुण्ड्रं त्रिपुण्ड्रं वा…अगस्त्यपत्त्राकारं वा धृत्वा भाले…सन्ध्यावन्दनमाचरेत् BrahmāṇḍP. iii. 38. 22.

**अगस्त्यपत्त्रोत्थ** ( agastyapattrottha ) *adj.* arising from the leaves of *Agasti grandiflora* मध्वाज्यागस्त्यपत्त्रोत्थरससंमर्दितेन च । टंकणेन ध्वजं लिप्त्वा द्रावयेदबलां नरः AnaṅgaRa. 6. 8.

**अगस्त्यपत्नी** ( agastya-patnī ) *f.* wife of (sage) Agastya (Lopāmudrā) साहं कदाचिदगस्त्यपत्नीं लोपामुद्रां नमस्कृत्य … दारकं रुदन्तमद्राक्षम् DaśKuC. 82. 16; लोपामुद्रयागस्त्यपत्न्या … अर्चितोपासिता LalitāSaBh. 137. 12 (*on* 179)

**अगस्त्यपद** ( agastya-pada ) *n.* **1** name of a sacred spot in the Himālayas अगस्त्यवट( v. l. अगस्त्यपद )मासाद्य वसिष्ठस्य च पर्वतम् MahāBhā. i. 207. 2; cf. **अगस्त्यपाद**. **2** name of a sacred spot at Gayā पञ्चाग्नीनां पदान्यत्र इन्द्रागस्त्यपदे परे VāyuP. ii. 47. 19.

**अगस्त्यपराभव** ( agastya-parābhava ) *m.* defeat from (sage) Agastya ( सिन्धुरुवाच ) न तान्मे बिभ्रतः खेदो विनागस्त्यपराभवात् BrahmP. 172. 12.

**अगस्त्यपरिगृहीत** ( agastya-parigṛhīta ) *adj.* [ *f.* -ā ] adopted or accepted (for residence) by (sage) Agastya (south) मत्कार्ये तु भूयो भवद्दर्शनमपहाय नास्त्यगस्त्यपरिगृहीतायां ककुभि किंचित् TilaMañ. 172. 15.

**अगस्त्यपरिपीत** ( agastya-paripīta ) *adj.* completely drunk by (sage) Agastya अगस्त्यपरिपीतसलिलैः सागरैरिव महाविपणिपथैरुपशोभिता…अवन्तीषूज्जयिनी नाम नगरी Kād. 50. 8; अगस्त्यपरिपीतोद्वान्तस्य वारिधे रत्नान्युच्छिष्टधनमित्यस्पृश्यानि UdaySuKa. 56. 22.

**अगस्त्यपस्त्या** ( agastya-pastyā ) *f.* the dwelling place of (sage) Agastya अगस्त्यपस्त्याङ्गणवह्निवेह्निना नभस्वता दत्तकरावलम्बनः । …समयः समाययौ Surath. 5. 2.

**अगस्त्यपाद** ( agastya-pāda ) *m.* name of a sacred spot in the Himālayas अगस्त्यवट( v. l. अगस्त्यपाद )मासाद्य वसिष्ठस्य च पर्वतम् MahāBhā. i. 207. 2. cf. **अगस्त्यपद**.

**अगस्त्यपीत** ( agastya-pīta ) *adj.* drunk by (sage) Agastya अगस्त्यपीततोयेऽब्धौ परितो राजनन्दनैः । खाताधः पातिते क्षेत्रे BrahmāṇḍP. ii. 53. 23; ii. 52. 16; ii. 56. 53; पूर्वैरियानयमखानि तुरंगहेतोः पातालमूलमवलोकितुमुत्तैस्तैः । तत्कारणं सुरसरित्पयसामपूरि तप्त्वापरेण भवतोऽयमगस्त्यपीतः RāmC. 25. 54; अगस्त्यपीतस्याम्भोधेः पूरणाय…सुरनिम्नगा । भगीरथोदितं चक्रे BrahmP. 78. 71.

**अगस्त्यपीतार्णव** ( agastyapītārṇava ) *m.* the ocean drunk by Agastya क्रमेणासीन्मुहूर्तेन विकटोदरभीषणम् । अगस्त्यपीतार्णववच्छून्यमेव रणाङ्गणम् YogVā. iii. 38. 17.

**अगस्त्यपुत्र** ( agastya-putra ) *m.* son of (sage) Agastya ( क्रतुः ) इध्मवाहं स पुत्रत्वे जग्राह…अगस्त्यपुत्रं धर्मज्ञम् MatsyaP. 202. 9.

**अगस्त्यपुष्पतोय** ( agastyapuṣpa-toya ) *n.* juice or decoction from the flowers of *Agasti grandiflora* ( अभ्रकम् ) अगस्त्यपुष्पतोयेन कुमुदानां रसेन च । …त्रिदिनं स्वेदयेद्देवि जायते दोषवर्जितम् Rasā. 6. 10; 6. 22.

**अगस्त्यपूर्वक** ( agastya-pūrvaka ) *adj.* preceded by (i. e. headed by) (sage) Agastya ततः प्रसन्ना ह्यभवन्नृषयोऽगस्त्यपूर्वकाः BrahmP. 118. 26.

**अगस्त्यप्रभव** ( agastya-prabhava ) *adj.* arising from (i. e. caused by) (sage) Agastya त्रासादगस्त्यप्रभवात् कुतोऽपि तरङ्गमालीव निलीनमूर्तिः YātrāPra. 1. 36.

**अगस्त्यप्रमुख** ( agastya-pramukha ) *adj.* headed by (sage) Agastya अस्मिन्नगस्त्यप्रमुखाः प्रदेशे भूयांस उद्गीथविदो वसन्ति UttaRāC. 2. 3; सर्वे … अगस्त्यप्रमुखा जग्मुः पुण्यं स्वं स्वं तपोवनम् RāmāMañ. 464. 16; ब्रूहि रामाय मुनयः समागत्य बहिः स्थिताः । अगस्त्यप्रमुखाः सर्वे आशीर्भिरभिनन्दितुम् AdhyāRā. vii. 1. 9.

**अगस्त्यप्रसादन** ( agastya-prasādana ) *n.* propitiating (sage) Agastya अत्यायतश्च यस्मिन्दशरथसुतशरनिपातितो योजनबाहोर्बाहुरगस्त्यप्रसादनागतनहुषाजगरकायशङ्कामकरोदृषिजनस्य Kād. 22. 3.

**अगस्त्यप्रार्थना** ( agastya-prārthanā ) *f.* supplication to (sage) Agastya यत्र योजनबाहोश्च रामो भुजमपातयत् । अगस्त्यप्रार्थनायातनहुषाजगरोपमम् KathāSaSāg. xii. 35. 50.

**अगस्त्यभक्षण** ( agastya-bhakṣaṇa ) *n.* drinking by (sage) Agastya ( कृष्णः ) समुद्राणां दर्पभङ्गं चकारागस्त्यभक्षणात् BrahmVaiP. iv. 56. 61.

**अगस्त्यभवन** ( agastya-bhavana ) *n.* abode of (sage) Agastya कुञ्जरो नाम पर्वतः । अगस्त्यभवनं यत्र निर्मितं विश्वकर्मणा Rāmā. iv. 40. 34; अगस्त्यभवनं चैव यदगम्यं कृतं पुरा MatsyaP. 163. 74.

**अगस्त्यभाव** ( agastya-bhāva ) *m.* the nature of being Agastya (i. e. the sage and the tree) प्रकृष्टकुटजैरप्यगस्त्यभावरहितैः … उपवनैरशून्यपश्चिमभूमिकाभागम् … तिलकमञ्जरीमन्दिरमपश्यम् TilaMañ. 370. 20.

**अगस्त्यभास्** ( agastya-bhās ) *f.* brilliance of the star Canopus अजातविच्छेदलवैः सरोद्भवैरगस्त्यभासा दिशि निर्मलत्विषि । धुतावधि कालममृत्युशङ्किता निमेषवत्तेन नयस्व केलिभिः NaiṣC. 9. 57.

**अगस्त्यभुक्त** ( agastya-bhukta ) *adj.* eaten by (sage) Agastya कुर्याद्वयं स्वहस्तेन प्रभूतधनसंपदाम् । अगस्त्यभुक्ते वातापौ कोषस्थान्यैः कृतो व्ययः CāruCaS'. 93.

**अगस्त्यभ्रातृ** ( agastya-bhrātṛ ) *m.* brother of (sage) Agastya ददर्श ह । …अगस्त्यं च अगस्त्यभ्रातरं तथा Rāmā. i. 1. 33; iii. 10. 36; (रामः) अगस्त्यभ्रातरं नत्वा अगस्त्यं तत्प्रसादतः । धनुः खड्गं च संप्राप्य दण्डकारण्यमागतः AgniP. 7. 2; अगस्त्यभ्रातासौ ग्रीष्मे पञ्चाग्निमध्यगः…तपस्तेपेऽतिदारुणम् SkandP. iii(1). 13. 21; इत्युक्त्वा राघवः प्रायादगस्त्यभ्रातुराश्रमम् RāmāMañ. 116. 4.

**अगस्त्यमण्डल** ( agastya-maṇḍala ) *n.* region (where the hermitage) of sage Agastya (is situated) परेद्युः प्रातरुत्थाय जग्मुस्तेऽगस्त्यमण्डलम् AdhyāRā. iii. 3. 2.